National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 56-57
© 2025 NJHSR
www.sanskritarticle.com

**स. वासुदेवः**
अनुसन्धाता,
श्री चन्द्रशेकरेन्द्रसरस्वति विश्वमहाविद्यालयः
एनातूर, काञ्चीपुरम

**मार्गदर्शिका**
**डॉ. सुजाताराघवन्**
सहायक प्रोफेसर,
श्री चन्द्रशेकरेन्द्रसरस्वति विश्वमहाविद्यालयः
एनातूर, काञ्चीपुरम

**Correspondence:**
**स. वासुदेवः**
अनुसन्धाता,
श्री चन्द्रशेकरेन्द्रसरस्वति विश्वमहाविद्यालयः
एनातूर, काञ्चीपुरम

# शरणागतिदीपिकास्तोत्रे विशिष्टाद्वैतवेदान्तानुभवः

**स. वासुदेवः, डॉ. सुजाताराघवन्**

शारीरकार्थम इत्यस्य कारणत्वम् इत्यर्थः। उपायत्वं उपेयता इति शारीरकतात्पर्यं इह चापि व्यवस्थितं इति जगतः कारणत्वम्। अयं च विषयः मोक्षोपायं, मोक्षानुभवं इत्यादीन मूलमन्त्राधिकारे स्वामि निगमान्त महादेशिकः विचारितवान्। अयमेव विषयः शरणागतिदीपिकायां विचार्यते। यथा

पद्मापतेः---महानससंप्रदायम् ॥ अनेन ज्ञायते यत् अस्य स्तोत्रस्य लक्ष्यं भवति शारीरकार्थानुसन्धानम्। श्रीभाष्ये श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे इति अस्य वाक्यस्यार्थम् आधारीकृत्य पद्मापतेः इति अत्र अनुसन्धाय "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ इत्यनेन श्रुतिना अवगम्यते यत् श्रिया दद्वारैव परब्रह्मप्रापणम् इति वेदेऽपि अङ्गीकृतत्वात्, अत्र श्रीमरगतवल्ली नायिका समेतं दीपप्रकाशं स्तोत्रयति। अनेनैव पद्मापतीरिति समारम्भणं कृतवान् ।एवं "नित्यं श्रियाः******** दैवतमद्वितीयम्" इत्यनेन श्रियः पतिः "अखिलहेय प्रत्यनीक कल्याणैकतानः इति अनेन यत्र परमात्मा विषयः प्रोक्तः तत्र लक्ष्मीविशिष्टपरमात्मानमेव दद्योतयति इत्यिमं विषयम् अनुसृत्यैव नित्यं श्रिया वसुधया च निवेष्यमाणम् इत्युक्तवान्।

एवं "निर्व्याज***** भरितम्" इत्यनेन परमात्मनः दयागुणं स्वरूपे निर्व्याजं भवति। स च दया गुणः चेतनानाम् अस्माकं भवितव्यं चेत् एकं व्याजम् आधारीकृत्यैव भवति। अत एव "सर्वज्ञोऽपि हि वेश्वेशः सदा कारुणिकोऽपि सन् संसारतन्त्रवाहित्वात् रक्षोपेक्षां प्रतीक्षते" इतयनेन अस्माकं दया गुणः निर्व्याजं न भवति ।

"वैषम्य नैघृण्ये न सापेक्षत्वात्" "कृतप्रयत्नापेक्षस्तु विहित प्रतिषिद्धा वैय्यर्थादिभ्यः" इति उभयोः सूत्रयोः अयं च विषयः प्रतिपादितः। एतत् न अङ्गीक्रियते चेत् सर्वमुक्तिप्रसङ्गः स्यात्। इमं विषयम् अनुसृत्यैव अधिकरणसारावळ्यां परायत्ताधिकरणे विचार्यते। यत् दया द्विधा भवति नित्यं, अनित्यम् च। नित्यं तु जीवस्य सत्त्वं स्थितित्वं क्षेमत्वं च कारयति। अनित्यं तु जीवेन कृत कर्मभिः प्राप्यमाण फलं दास्यति। एतादृशी नित्यदयया सह विद्यमान श्रीदेवी भूदेवी समेतः वेदैः देव इति स्थापितः परमात्मा दीपप्रकाशः वेगवतीतीरे स्थित्वा अस्मान् अनुगृह्णाति।

एवं “भवचरणमितीरयन्ति ये वै पापीयसोऽपि शरणागति शब्दभाजः” शरणागतिः इत्युच्यते। इममेव अर्थं श्रीभाष्यकारः “तस्य च वशीकरणं शरणागतिरेव” इत्युक्तवान्। अनेन श्रीभाष्यकारः दीपप्रकाशे स्वात्मानं निक्षिप्तवान्।

एवं “स्वामिन् गभीरसुभगं****सरसिजाश्रयमङ्गकं ते॥“इत्यनेन श्लोकेन वेदे उक्त “सदा पश्यन्ति सूरयः” इत्यिमां सूक्तिम् अनुसृत्यैव अस्य अर्चावतारस्य दीपप्रकाशस्य स्वरूपवर्णनम् करोति। एवं अग्रिम श्लोकत्रयेण श्रुति, स्मृति, इतिहास, पुराणानां च साहाय्येन परतत्वनिर्णयं करोति।

“आविश्य धारयसि*****एष गीतः॥“ एवं “विश्वं शुभाश्रयवती****तत्वविदस्तदाह॥“ इति श्लोकाभ्यं भगवतः सर्वव्यापित्वं, शरीरशरीरीभावत्वं च निरूपयति। एवं श्रीवैकुण्ठस्तवेऽपि “यस्थावरः***इतीरितस्थैः॥ “इत्यनेन भगवतः स्वरूपं, दिव्यमङ्गळविग्रहं, जगत्कारणत्वं, आनन्दकल्याणगुणवत्वं च विचार्य निर्गुणब्रह्मवादीन् खण्डनं कृत्वा सगुणब्रह्मत्वं स्थापयति।

एवं “ज्ञानं बलं*** सद्गुणौघः॥“इत्यनेन श्लोकेन ब्रह्मणः ज्ञानस्वरूपत्वं, सत्यत्वं, ज्ञानत्वं, अनन्तत्वं च विचारितं भवति। एवं स्वरूपरूपगुणविभूतिमान् श्रीमन्नारायणः एव इति साधितम्। “कारणं तु ध्येयः” इत्यनेन उपासकः भक्त्या, प्रपत्या वा श्रीमन्नारायणम् एव उपासनं करोति। स एव नारायणः सिद्धोपेयः इत्यिमं विषयम् अधिकृत्य “सत्ता स्थितिः***उपायमाहुः॥“इति इमं श्लोकम् उक्तवान्। एवं एनं सिद्धोपायरूपं भगवन्तं प्राप्तुं “भक्तिः प्रपत्तिरथवा भगवन् तदुक्तिः। तन्निष्टसंश्रय इतीवविकल्प्यमानम्॥ “इत्यनेन भगवता उक्त चतुर्षु उपायेषु भक्त्युपायं वर्णयति। यथा – “योग्यं यमैश्च****विलोकयन्ति॥“ एवं शरणागतेः उपायं वर्णयति यथा - “नित्यालसार्हं **** षडङ्गयोगम्” इत्यनेन श्लोकेन षडङ्गयोगभूतं, न्यासविद्यां उत प्रपत्तिं च विचार्य महताम् ऋषीणां/महनीयानां वर्णनं कृत्वा “इत्थं त्वदेक****इह त्वयाऽहम्॥“ इत्यनेन श्लोकेन इदं स्तोत्रं समापयति निगमान्तमहादेशिकः॥